International Journal of Sanskrit Research 2017; 3(4): 156-158

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(4): 156-158
© 2017 IJSR
www.anantaajournal.com
Received: 27-05-2017
Accepted: 28-06-2017

**कुलदीप पैन्यूली**
शोधच्छात्र: श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठम्
नवदेहली, भारत

**Correspondence**
**कुलदीप पैन्यूली**
शोधच्छात्र: श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठम्
नवदेहली, भारत

# सांख्यदर्शने सत्कार्यवादस्वरूपनिरूपणम्

## कुलदीप पैन्यूली

**प्रस्तावना**

यदिदं महदादिकार्यं तत् किं प्रधाने सत्, उत असत्, इत्यस्मिन् विषये परिलक्ष्यते महान् मतभेद:। यत् किमपि कार्यं विलोक्य ज्ञायते यदस्य किमपि कारणमवश्यमस्ति। अतो भारतीयदार्शनिकसंप्रदायेषु प्रायश: सर्वदार्शनिकै: कारणकार्यभावमीमांसा स्व-स्व ग्रन्थेषु विहिता।[1]

सत्कार्यवादस्वरूपम्- किमपि कार्यं कारणं विना सम्पन्नं न भवति, अत्र कश्चिद् अपि स्वासहमतिं विप्रतिपत्तिं वा न यच्छति। परन्तु कार्यकरणयो: स्वरूपं किम्? तथा कार्यं कारणात् किं सर्वथा पृथग् भवति उत कार्यस्य एव परिवर्तितस्वरूपात्मकम् एव कारणं भवति? इत्यादिप्रश्ना: अत्यन्तविचारणीया: सन्ति। कार्यकारणभावसम्बन्धानुसारं यदि अस्य ब्रह्माण्डस्य मूलकारणस्य अनुसन्धाानं क्रियते तर्हि अनवस्थादोष: समागच्छति। यत: प्रत्येककार्यस्य किमपि कारणम् अवश्यं भवति, तदपि स्वकारणस्य कार्यात्मकम् एव भवति। अत: कार्यकारणभावस्य व्याख्या स्पष्टतया अपेक्षिता अस्ति, या व्याख्या दार्शनिकै: अपि मान्या स्यात्। उपनिषत्सु अपि एवंविधजिज्ञासाया: विवेचनं प्राप्यते यत् सृष्टे: प्राक् काचित् सत्ता आसीद् न वा?

> ''एक आहुरसदेवेदमग्रम् आसीदेकमेवाऽद्वितीयम्''

अयं कार्यकारणभाव: द्वाभ्यां प्रकाराभ्यां व्यवस्थित: कर्तुं शक्य:, कारणवादकार्यवादभेदाभ्याम्। कारणवाद: अपि प्रकारद्वयात्मक: सत्कारणवादासत्कारणवादाभ्याम्। एवमेव कार्यवाद: अपि प्रकारद्वयात्मक: सत्कार्थवादासत्कार्यवादाभ्याम्। असत्कारणवादस्य च अयम् अभिप्राय: यत् कारणस्य वास्तविकसत्तां विनैव कार्यस्य समुत्पत्ति:। अयं सिद्धान्त: शून्यवादिनां बौद्धानाम् अस्ति[2]। एतेषां मतम् अस्ति यत् किमपि कारणं स्वविनाशस्य अनन्तरम् एव किमपि कार्यम् उत्पादयति। उदाहरणत: बीजविनाशानन्तरम् एव अङ्कुत्पादनं भवति यच्च कार्यात्मकम् अस्ति। अस्य अर्थ: अयम् अस्ति यद् अस्या: सृष्टे: उत्पति: कस्यचिद् वस्तुन: विनाशाद् अर्थाद् अभावाद् अभूत्। उत्पत्यनन्तरम् इदं जगत् सद् अर्थाद् वास्तविकम् अस्ति। प्रक्रिया इयं जगत: प्रत्येकस्मिन् वस्तुनि प्राप्यते अत: तस्या: इदम् एव रहस्यम्।

एतद्विपरीतं मतम् अद्वैतवादिनाम् अस्ति। एते च इदम् आमनन्ति यत् त्रिकालावस्थितं सद् एव एकं तत्वम् अस्ति 'एकमेवाद्वितीयं ब्रह्म'[3] स्रष्टे: प्रपञ्चभूतं जगद् इदं यद् अस्माकं समक्षम् अस्ति, तत्तु एकस्य सत: एव नामरूपात्मकम् अस्ति। नामरूपात्मकानि तत्वानि तादृशानि न सन्ति यानि परमार्थत: सत्स्वरूपाणि

---

1 सांख्यसुधा पृ. 3

2 सांख्यकारिका पृ. सं. (xxxiv)

3 छांदोग्योपनिषद्- 6/2/1

स्यु:। एतेषां परीक्षानन्तरं यत्तत्वं परमार्थत: सद् अस्ति स: एव आत्मा अर्थात् चैतन्य: एक: एव अस्ति। आकाशादिस्थूलतत्वानि, मनोबुद्ध्यादिसूक्ष्मतत्वानि अपि स्वत: एतादृशानि न सन्ति यानि परमार्थत: सत्स्वरूपाणि स्यु: अपितु इदं निखिलं जगत् कारणभूतस्य तस्य आत्मतत्वस्य एव विवर्तभूतम् अस्ति, यस्य अभिप्राय: अयम् अस्ति यद् आत्मतत्त्वम् एतेषु परिणंत नास्ति अपितु तत्तत्वं प्रतीतमात्रं भवति, अत एव उक्तं यद्- ''अतात्त्विकोऽन्यथाभावो विवर्त: स: उदीरित:'' इति।

नैयायिकानां सिद्धान्त: कारणस्य अपेक्षया कार्यम् एव दृष्टौ निधाय प्रवर्तते। एतेषां कथनम् इदम् अस्ति यत् कार्यं स्वोत्पत्ते: प्राक् कुत्रापि कस्मिन् अपि रूपे अवस्थितं न भवति, अपितु सर्वथा एकस्मिन् नूतनवस्तुस्वरूपे उत्पन्नं भवति। अत्र एतद् अभिप्रेतं नास्ति यद् अभावस्य उत कारणस्य विनाशात् कार्यम् उत्पद्यते, अपितु कारणस्य व्यापारात् कार्यम् उत्पद्यते। कारणम् आदाय कर्ता कार्यानुकूलव्यापारं करोति, यस्य फलस्वरूपे एकं नूतनं वस्तु कार्यरूपे समुत्पन्नं भवति, यच्च कारणात् तत्त्वत: पृथग् भवति। एवम्प्रकारेण कार्यं कारणम् उभयम् अपि परमार्थत: तु सद् अस्ति परन्तु एकरूपम् उत अभिन्नं नास्ति। येभ्य: परमाणुभ्य: सृष्टि: इयं जाता अस्ति ते तु सत्वस्वरूपा: एव सन्ति। यतोहि सृष्टि: इयं स्वोत्पत्ते: प्राग् अथवा कारणव्यापारात् पूर्वं विद्यमाना नासीद् अत: परमाणुनिर्मितसृष्टि: इयम् असद्रूपेण वक्तुं शक्यते। एवं प्रकारेण कार्यस्य कारणव्यापाराद् अथवा कार्योत्पत्ते: प्राक्स्थिति: एव असत्कार्यवाद:। यदि कार्य स्वोत्पत्ते: पूर्वस्माद् एव विद्यमानं स्यात् तर्हि कस्यचित् कर्तु: किं प्रयोजनम्। सचेतनकर्तारं विना कस्यचिद् अपि कार्यस्य समुत्पादनं भवितुम् एव नार्हति। सांख्यसिद्धान्तस्य प्रवर्तक: आचार्य: महामुनि: कपिल: कार्यकारणभावस्य वादत्रयेषु एकम् अपि वादं नाङ्गीकरोति। अस्य अस्वीकारणस्य च इदम् एव कारणं यद् वादत्रयस्वीकृते अपि सांख्यदर्शनस्य मूलतत्त्वप्रधानस्य अर्थाद् अव्यक्तमूलप्रकृते: सिद्धि: नैव भवितुं शक्नोति। सांख्यदर्शनप्रवृर्तकाचार्य: एतादृशवदम् एव अन्वेषयन् आसीद् य: निखिलविश्वप्रपञ्चम् एकीकृत्य एकस्मिन् सर्वमूलकारणरूपे संस्थापयेत्। स्याद् नाम तत्तत्त्वं सर्वथा अव्यक्तम्। अत एव तेन आचार्येण अयं सिद्धान्त: प्रतिपादित: यत् कार्येषु परस्परानुरूपता एव एतद् विज्ञापयति यत् तेषां समेषां कार्याणां मूले एकम् एव तत्त्वम् अस्ति। यस्माद् एतद् विविधजगद् उत्पन्नं भवति। न केवलम् एतदेव अपितु मम् कारणम् एव कार्यरूपे परिणतं सत् प्रतिभासते। अस्य अभिप्राय: अयम् अस्ति यत् कार्य स्वोत्पत्ते: प्राग् अपि स्वकारण विद्यमानं भवति तथा कारणव्यापारे सति प्रकटितं भवति। अनेन प्रकारेण कार्यस्य आविर्भावातिरोभावौ एव भवत:, नूतना उत्पत्ति: विनाश: वा न भवति। सूक्ष्मरूपेण स्वकारणे वर्तमानस्य कार्यस्य अविर्भाव: एव तस्य उत्पत्ति: तथा स्वकारणे तिरोभाव: एव विनाश: भवति। यथा कच्छप: स्वहस्तपादाद्यङ्गानाम् आवश्यकतानुसारम् आविर्भावतिरोभावौ करोति, अयम् एव सत्कार्यवाद:।[4]

ब्रह्माण्डस्य निखिलतत्वानाम् एकस्याम् एव त्रिगुणात्मकमूलप्रकृतौ समावेशं विधाय तां च जडस्वरूपां प्रसाध्य प्रकृतिपुरूषयो: अर्थाद् जडचेतनयो: उभयो: तत्त्वयो: स्वरूपं परमार्थरूपे सद् इत्युक्त्वा द्वैतवादस्य प्रतिष्ठापनम् एवं सांख्यदर्शनस्य लक्ष्यम् अस्ति। यस्य सिद्धे: सोपानभूत: अयं सत्कार्यवाद: एव सांख्यदर्शनस्य मौलिक: सिद्धान्त: अस्ति।

असदकरणादुपादानग्रहणाात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्[5]।।

अस्य अयम् अर्थ: यत् कार्यं स्वोत्पते: प्राग् अथवा कारणस्य कार्योत्पत्यनुकूलव्यापारात् प्राग् अपि विद्यमानं भवति। यत:-

**असदकरणात्** - यत् सद् अर्थात् कस्मिंश्चिद् अपि रूपे कुत्रापि विद्यमानं न भवति। तस्य उत्पत्ति: कथं भवितुं शक्नोति? जगति किमपि वस्तु सर्वथा नूतनरूपेण न उत्पन्नं भवति, यतोहि अभावस्य भाव: कथमपि नैव भवितुं शक्नोति। अत एव गीतायां भगवता श्रीकृष्णेन उक्तम् ''नासतो विद्यते भाव: नाभावो विद्यते सत:''[6] इति। यदि अभावाद् एव भावोत्पत्ति: स्यात् तर्हि अभावस्य सर्वत्र सुलभत्वात् समेषां वस्तूनाम् उत्पत्ति: सर्वत्र स्वत: भवितव्या, यतोहि असदवस्थायां यदा वस्तु एव न भवति तर्हि तस्मिन् तस्य गुणधर्मा: कथं विद्यमाना: भवेयु:? तिलमर्दनात् तैलोत्पति: ब्रीहिकुट्टनाच्च तण्डुलोत्पत्ति:, गोदोहनाद् दुग्धोत्पत्तिश्च अत्र प्रमाणभूता अस्ति यत् तैल-तण्डुल-दुग्धानि स्वकारणेषु तिल-ब्रीहि-गोषु पूर्वस्माद् एव विद्यमानानि आसन्। अनेन प्रतिपादनेन इदम् एव सिद्धं भवति यत् कार्यवस्तु स्वोत्पत्ते: प्राग् अपि स्वकारणवस्तुनि विद्यमानम् आसीत्। कारणस्य कार्योत्पादकव्यापारानन्तरं तद् वस्तु व्यक्तं भवति। ''नासदुत्पादो नृश्रृङ्गवत्''[7] इति सांख्यसूत्रेऽपि अस्य उदाहरणं प्रदर्शयता सूत्रकृता उक्तं यद् यथा मनुष्यस्य श्रृङ्ग न भवति अत एव। तच्छूङ्गनिस्सरति अपि न, गवादिषु तत् श्रृङ्गं पूर्व स्माद् विद्यमानं भवति अत: निसरति अपि।

**उपादानग्रहणात्** - कार्यं स्वोत्पत्ते: प्राग् अपि स्वकारणे विद्यमानं भवति इति सिद्धये ग्रन्थकार: द्वितीयां युक्तिम् उपस्थापयति यद् यदापि वयं किमपि कार्य चिकीर्षाम: तदा तस्य कार्यस्य यद् उपादानकारणम् अस्ति तदेव कारणं गृहणीम:। उपादानं च तदेव वस्तु अस्ति यस्मिन् वस्तुनि कार्य समवायसम्बन्धेन तिष्ठति। अर्थात् कार्यं यस्मिन् वस्तुनि कार्यं समवायसम्बन्धेन तिष्ठति। अर्थात् कार्यं यस्मिन् पूर्वत: विद्यमानं भवति। तदेव तदुपादानकारणम् उच्यते। कथनस्य अयम् एव अभिप्राय: यत् समवायसम्बन्धेन कार्यं स्वोपादानेन सम्बन्धितं भवति। कार्यस्य असदवस्थायाम् उपादानेन सह तस्य सम्बन्ध: कथं भवितुं शक्नोति? यत: सम्बन्ध: सर्वथा उभयाश्रित: भवति। कारणेन सह कार्यस्य समकालीना सत्ता यावत् न स्वीकरिष्यन्ति न तावत् तस्मिन् सम्बन्ध: भवितुम् अर्हति। घटस्य उपादानं मृत्तिका अस्ति, तस्मिन् घट: पूर्वस्माद् एव सूक्ष्मरूपेण विद्यमानं भवति, अत एव कुम्भकार: घटनिर्माणाय मृत्तिकाम् एव आनयति। यदि एवं वदेद् यत् कारणेभ्य: कमपि सम्बन्धं

4 सां. का. पृ. सं.-(xxxvi)

5 सांख्यकारिका- 9

6 गीता- 2/16

7 सांख्यसूत्र प्र. अ. सू. सं.- 114

विनैव कार्योत्पत्तिः भविष्यति इति चेत्? तर्हि तस्य समाधानार्थम् अग्रिमा युक्तिः प्रदीयते।[8]

**सर्वसम्भवाभावात्** - कमपि सम्बन्धं विनैव कारणात् कार्योत्पत्तेः सिद्धान्तस्य यदि स्वीकरणं भवेत् तर्हि सर्वप्रकारककार्याणि सर्वप्रकारककरणेभ्यः जायन्ताम्। किन्तु नैवं भवति। किमपि वस्तु कस्माच्चिद् नियतवस्तुनः उत्पद्यते। सर्वस्माद् एव नहि। अन्यथा जनानां बहूनां समस्यानां समाधानम् अपि जातं स्यात्। किमपि वस्तु कुत्र जायते कुत्र च न? इति विवादः एव परिसमाप्तः स्यात्। यस्य पार्श्वे यत्किमपि वस्तु स्यात् तस्माद् एव सः सर्ववस्तूनाम् अवाप्तिः कर्तुं शक्नुयात्। परन्तु कस्मिन् अपि कारणे एतादृशं सामर्थ्यं नास्ति यस्मात् सर्वप्रकारककार्याणां समुत्पादनं भवेत्।[9]

**शक्तस्य शक्यकरणात्** - शक्तस्य शक्यकरणाद् इति। अस्य अयम् एव अर्थः यद्-यत् कारणं यस्य उत्पादने समर्थं भवति तदेव कारणं तं कार्यम् उत्पादयति नान्यः। अत्र एवं जिज्ञास्यते यत् कारणे कार्योत्पादनसामर्थ्यं यद् अस्ति तत् सर्वत्र भवति उत केवलसमर्थे एव? यदि सर्वत्र भवति तर्हि पूर्ववद् एव अव्यवस्था भविष्यति। तथा यदि एवम् उच्येत यत् सर्वत्र न अपितु शक्ये अर्थात् समर्थे कारणे एव भवति तर्हि कार्यस्य अविद्यमाने सति तस्मिन् समर्थकारणे कार्योत्पादन सामर्थ्यं कथं सिद्धं भविष्यति? अत्र इदं वक्तुं शक्यते यत् सर्वेषु अपि कारणेषु शक्तिः समाना न भवति। अतः इयं शक्तेः क्षमता एव अस्ति यद् वस्तु उत व्यक्तिः किमपि कार्यविशषम् जनयेद न तु सर्वान् अपित। अस्य उत्तरम् इदम् अपि भवितुम् अर्हति यत् सा विशेषशक्तिः कार्यात् सम्बद्धा अस्ति न वा? यदि सम्बद्धा अस्ति तर्हि सा असद् अर्थात् 'किञ्चिद् अस्त्येव नहि' इति कथ वक्तुं शक्यते? यतः असता सह सम्बन्धः भवितुम् एव नार्हति। असम्बद्धे सति सा एव पूर्वोक्ता अव्यवस्था भविष्यति। अतः इदं सत्यम् एव उक्तं यत् शक्तस्य शक्यकरणात्।

**कारणभावाच्च** - कार्यं कारणाद् अस्माद् अपि भिन्न नास्ति यत् कार्यं सर्वदा कारणात्मकम् एव भवति। कारणाद् भिन्नं कार्यं न भवति। यदा च कार्यं सद्रूपे अस्ति तर्हि तदभिन्नं असद् इति कथं वक्तुं शक्यते? पटः तन्तुभ्यः भिन्नः न भवति यतोहि सः तन्तूनाम् एव एकः धर्मः एव। यः यस्माद् भिद्यते सः तस्य धर्मः नैव भवितुम् अर्हति। यदि गौः अश्वात् सर्वथा भिन्नः अस्ति तर्हि गोत्वम् अश्वस्य धर्मः अपि नास्ति। कारणभावस्य अर्थः उपादानोपादेयभावः अपि अस्ति। येषु वस्तुषु उपादानोपादेयभावः भवति तानि वस्तूनि (परस्परम्) भिन्नात्मकानि न भवन्ति।

अत्र इदं वक्तुं शक्यते यद् ययोः द्वयोः वस्तुनोः अर्थक्रिया पृथक् पृथग् भवति ते उभे वस्तुनी परस्परं भिन्ने भवतः। तन्तुना पटस्य धारणयोग्यक्षमता सूचिकया क्रियते। पटश्च आच्छादनकार्ये उपयुज्यते। घटेन यद् जलानयनं भवति तद् मृत्तिकया कदापि न सम्भवति। एतस्यां परिस्थितौ उभयम् अपि अभिन्नम् इति कथनं कियद् उपयुक्तम् अस्ति। अस्य प्रश्नस्य उत्तरम् इदम् अस्ति यद् अर्थक्रियायाः व्यवस्था वस्तुभेदाद् न भवति। एकः एव अग्निः दाहक-पाचक-प्रकाशकत्वाद् न भिद्यते। अर्थाद् अनेकः न भवति। यथा सर्वे भृत्याः सम्मिलय पालकीम उद्वहन्ति। किं ते सर्वे अभिन्नाः भवन्ति? नैव। तन्तवः पृथक्पृथग्भूत्वा आच्छादनरूपकार्यं न कर्तुं शक्नुवन्ति। अपितु सम्मिल्य एव आच्छादनं कर्तुं सफलाः भवन्ति। अनया उपर्युक्तयुक्त्या इदम् एव सिद्धयति यत् कार्यं कारणव्यापारात् पूर्वम् अपि विद्यमानं भवति। तस्य कार्यरूपे आविर्भावः भवति। एवम्प्रकारेण एनं सिद्धान्तम् आधारीकृत्य पञ्चमहाभूतेभ्यः आरभ्य महत्तत्त्वपर्यन्तं सर्वाणि अपि स्थूलसूक्ष्मतत्त्वानि स्वकारणेषु तिरोहितानि भवन्ति। अन्ते च गुणत्रयेषु विलीनानि भवन्ति। येषां साम्यावस्थायाः एव नाम मूलप्रकृतिः अव्यक्तम् उत प्रधानम् अस्ति। सत्कार्यवादसिद्धान्तस्य च इयम् एव कृतार्थता अस्ति -

> ''सदेव कार्यमुत्पत्तेः पूर्वं कारकपूर्वकम्।
> आविर्भावतिरोभावौ जन्मनाशावुदीरितौ।।

सत्कार्यवादस्य विषये सारांशः अयम् अस्ति यद् कुम्भकारः दण्डसहायतया घटं निर्माति। तत्र एवं जिज्ञास्यते यद् घटः उत्पत्तेः प्राग् आसीद् न वा? अत्र नैयायिकवैशेषिकौ उत्तरयतः घटः स्वकारणमृत्तिकायां विद्यमानः नासीत्। अपितु अनुकूलसामग्रया घटोत्पत्तिाः अपूर्वा एव जायते। एषः एव सिद्धान्तः असत्कार्यवादनाम्ना ज्ञायते। सांख्यशास्त्रस्य च सिद्धान्तः अस्माद् भिन्नः एव अस्ति। सांख्यशास्त्रं उत्पत्तेः प्राग् कार्यं स्वकारणे अवश्यम् एव अव्यक्तरूपेण विद्यमानम् अस्ति इति स्वीकरोति। अर्थात् कार्यकारणयोः मध्ये वस्तुतः अभेदः एव। कार्यं कारणस्य विशेषावस्थातिरिक्तं किमपि अन्यद् नास्ति। अविद्यमानं वस्तु कथमपि नोत्पादयितुं शक्नोति कश्चिदपि। यदि वस्तुतः कारणे कार्यसत्ता नास्ति तर्हि कर्त्तुः बहुयत्नकृते सत्यपि तत्कार्यं नोपपन्नं भवेत्। यतः कार्यकारणभावसम्बन्धः अस्ति निश्चितः। यदि नैव स्यात् तर्हि किमपि कार्यं कस्मादपि कारणाद् उपपन्नं स्यात्। किन्तु न भवति एवम्। किं कारणम् अस्ति यत् तैलकारः तैलं निष्पादयितुं तिलानि एव स्वीकरोति। न तु बालुकाम् अपि, नापि पाषाणान् स्वीकरोति, अस्य उत्तरम् इदम् एव अस्ति यत् तैलं (कार्यं) तिलेषु (कारणे) पूर्वस्माद् एव विद्यमानम् अस्ति। अत एव तैलकारः तं विशेषोपादनम् एव गृह्णाति। सत्कार्यवादस्य अपि अस्ति रूपद्वयं परिणामवादविवर्तवादभेदाभ्याम्। परिणामवादश्च तत्र स्वीक्रियते यत्र कारणाद् उत्पन्नं कार्यं वास्तविकं स्यात्। यथा दुग्धाद् दध्युत्पत्तिः। अत्र दधिरूपं कार्यं वस्तुतः वास्तविकम् एव, न तु अवास्तविकम्। तस्य आकृतिः स्वरूपं दुग्धात् सर्वथा भिन्नम् एव। आस्वादे अपि पार्थक्यं दर्शितं भवति। यदि दुग्धे माधुर्य्यम् अस्ति तर्हि दध्नि आम्लत्वम् आभासते अतः एषः परिणामवादरूपसत्कार्यवादः एव सांख्यचार्यैः स्वीक्रियते। इति शम।

---

8 सां. का. पृ. सं.- (xxxvii)

9 गौडपादभाष्यं पृ. सं.- 23